"प्रसारणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"प्रसारणी च गन्धाली भद्रपर्णी कटम्भरा॥"
इति वैद्यकरत्नमालायाम्॥
यथा, शतपथब्राह्मणे ।३।४।१।१६। इत्यस्य भाष्ये "काश्मर्य्यो भद्रपर्णी प्रकृतौ पलाशवैकङ्कतादीनामैच्छिकत्वादत्र नियमविधिः॥")

**भद्रबलनः**, पुं, (भद्रं महद्बलनं बलमस्य।) बलरामः। इति शब्दमाला॥

**भद्रमल्लिका**, स्त्री, (भद्रा मल्लिका।) गवाक्षी। इति शब्दमाला॥

**भद्रमुञ्जः**, पुं, (भद्रो मुञ्ज इति कर्म्मधारयः।) मुञ्जभेदः। रामशर इति शरपत इति च भाषा। तत्पर्य्यायः। शरः २ बाणः ३ तेजनः ४ इक्षुवेष्टनः ५। अथ मुञ्जस्य पर्य्यायः। मुञ्जः १ मुञ्जातकः २ बाणः ३ स्थूलदर्भः ४ सुमेधसः ५। एतयोर्गुणाः।
"मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा।
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित्॥
दोषत्रयहरं वृष्यं मेखलास्वपयुज्यते॥"
इति भावप्रकाशः॥

**भद्रमुस्तकः**, पुं, (भद्रो मुस्तकः।) नागरमुस्तकः। इत्यमरः ।२।४।१६०॥ (तत्पर्य्यायो यथा,—
"मेघाख्यं मुस्तकं मुस्ता गाङ्गेयं भद्रमुस्तकम्॥"
इति वैद्यकरत्नमालायाम्॥)

**भद्रमुस्ता**, स्त्री, (भद्रा मुस्ता।) नागरमुस्तकः। तत्पर्य्यायः। वराही २ गुन्द्रा ३ ग्रन्थिः ४ भद्रकाशी ५ कशेरुः ६ क्रोड़ेष्टा ७ कुरुविन्दाख्या ८ सुगन्धिः ९ ग्रन्थिला १० हिमा ११ बल्या १२ राजकशेरुः १३ कच्छोत्था १४ मुस्ता १५ अर्णोदः १६ वारिदः १७ अम्भोदः १८ मेघः १९ जीमूतः २० अब्दः २१ नीरदः २२ अभ्रम् २३ घनः २४ गाङ्गेयः २५। अस्या गुणाः। कषायत्वम्। तिक्तत्वम्। शीतत्वम्। पाचनत्वम्। पित्तज्वरकफनाशित्वम्। संग्राहित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकः।
कुरुविन्दश्च संख्यातोऽपरः क्रोड़कशेरुकः॥
भद्रमुस्तञ्च गुन्द्रा च तथा नागरमुस्तकः।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुहृत्।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते॥
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम्॥"
इति भावप्रकाशः॥

**भद्रयवः**, पुं, क्ली, (भद्रः शुभदो यवः।) इन्द्रयवम्। इत्यमरः। २। ४। ६७॥ (विवरणमस्य इन्द्रयवशब्दे ज्ञातव्यम्॥)

**भद्ररेणुः**, पुं, (भद्रा रेणवोऽस्य।) ऐरावतहस्ती। इति त्रिकाण्डशेषः॥

**भद्रवत्**, क्ली, (भद्रमस्त्यस्मिन्निति। मतुप् मस्य वः।) देवदारु। इति राजनिर्घण्टः॥

**भद्रवती**, स्त्री, (भद्रं विद्यतेऽस्याम्। भद्र+मतुप्। मस्य वः। ङीप्।) भद्रपर्णी। इति जटाधरः॥ (कट्फलः। अस्य पर्य्यायो यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च।
श्रीपर्णी काकुमुदिका भद्रा भद्रवतीति च॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
कल्याणविशिष्टे, त्रि। यथा, महाभारते। ४। २४। १८।
"इमाश्च नः प्रियां वीर! वाचं भद्रवतीं शृणु॥"
श्रीकृष्णस्य नाग्नजितीगर्भजाता कन्या। यथा, हरिवंशे। १६०। १०-११।
"मित्रबाहुः सुनीथश्च नाग्नजित्याः प्रजाः शृणु।
भद्रकालो भद्रविन्दः कन्या भद्रवती तथा॥"
मधोर्माता। यथा, हरिवंशे। ३६। २।
"आसीन्मरुवसः पुत्त्रः पुरुद्वान् पुरुषोत्तमः।
मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरूद्वह!॥")

**भद्रवर्म्मा**, [न्] पुं, (भद्रेण वृणोति आत्मानमिति शेषः। वृ+मनिन्।) नवमल्लिका। इति शब्दचन्द्रिका॥ (विषयोऽस्य नवमल्लिकाशब्दे ज्ञातव्यः॥)

**भद्रवला**, स्त्री, (भद्रा वला।) लताविशेषः। गन्धभादालिया इति भाषा। तत्पर्य्यायः। सरणा २ प्रसारणी ३ कटम्भरा ४ राजबला ५। इत्यमरः। २। ४। १५३॥ अस्याः पर्य्यायान्तरं गुणाश्च प्रसारिणीशब्दे द्रष्टव्याः॥ बला। इति राजनिर्घण्टः॥

**भद्रवल्लिका**, पुं, (भद्रा वल्लिका।) गोपवल्ली। इति रत्नमाला। अनन्तमूल इति भाषा॥

**भद्रवल्ली**, स्त्री, (भद्रा चासौ वल्ली चेति कर्म्मधारयः।) मल्लिका। माधवीलता। इति राजनिर्घण्टः॥ लताविशेषः। मदनमाली इति हापरमाली इति च भाषा। तत्पर्य्यायः। शातभीरुः २ भूमिमण्डा ३ अष्टपादिका ४। इति रत्नमाला॥

**भद्रश्रयं**, क्ली, (भद्राय श्रीयते गृह्यते इति। श्रि+कर्म्मणि अच्।) चन्दनम्। इति रत्नमाला॥

**भद्रश्रीः**, पुं, (भद्रा श्रीरस्य।) चन्दनवृक्षः। इत्यमरः। २। ६। १३१॥

**भद्रसोमा**, स्त्री, (भद्रः सोम इवास्या द्रव इति। टाप्।) गङ्गा। इति शब्दमाला॥ (कुरुवर्षस्थनदीविशेषः। यथा, मार्कण्डेये। ५९। २३।
"तस्मिन् कुलाचलौ वर्षे तन्मध्ये च महानदी।
भद्रसोमा प्रयात्युर्व्वीं पुण्यामलजलौघिनी॥")

**भद्रा**, स्त्री, (भद्र+अजादित्वात् टाप्।) रास्ना। कृष्णा। व्योमनदी। तिथिभेदः। सा तु द्वितीया सप्तमी द्वादशी च॥ प्रसारिणी। (अस्याः पर्य्यायो यथा,—
"प्रसारिणी राजबला भद्रपर्णी प्रतापनी।
सरणी सारणी भद्रा बला चापि कटम्भरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कट्फलम्। अनन्ता। इति मेदिनी। रे, ७१॥ जीवन्ती। अपराजिता। नीली। वला। शमी। वचा। दन्ती। हरिद्रा। श्वेतदूर्व्वा। काश्मरी। (पर्य्यायोऽस्या यथा,—
"श्रीपर्णी काश्मरी भद्रा गाम्भारी गोपभद्रिका।
कुमुदा च सदाभद्रा कट्फला कृष्णवृन्तिका॥"
इति वैद्यकरत्नमालायाम्॥
चन्द्रसूरः। तत्पर्य्यायो यथा,—
"चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
सारिवाविशेषः। गौः। इति राजनिर्घण्टः॥ काकोडुम्बरिका। इति रत्नमाला॥ (भद्राश्ववर्षस्थनदीभेदः। यथा, मार्कण्डेये। ५९। ७।
"शीता शङ्खावती भद्रा चक्रावर्त्तादिका-स्तथा॥")
गङ्गायास्त्रिस्रोतोऽन्तर्गतस्रोतोविशेषः। तत्तु उत्तरे कुरुवर्षीयगङ्गा। इति पुराणं शब्दमाला च॥ बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरात्मजा १२ खदूरवासिनी १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्ददा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥ छायागर्भजाता सूर्य्यकन्या। यथा,—
"यमनौ तु ततस्तस्यां जनयामास भास्करः।
शनैश्चरञ्च भद्राञ्च छायायाममितद्युतिः॥
तथा च तेजसा विष्णोस्तस्य चक्रमवर्त्तयत्।
तदप्रतिहते युद्धे दानवान्तचिकीर्षया।
तद्भगिनी सुखतो भद्रा नियुक्तैव विगर्हिता॥"
इति वह्निपुराणे वैवस्वतानुकीर्त्तनम्॥
सुभद्रा। यथा,—
"आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता।
तस्यां रथे समारोप्य रामं मां भद्रया सह॥"
इति स्कान्दे भगवद्वाक्यम्॥ *॥
विष्टिभद्रा यथा,—
"एकादश्यां चतुर्थ्यान्तु शेषार्द्धे शुक्लपक्षके।
अष्टमीपौर्णमास्योस्तु पूर्व्वार्द्धे विष्टिसम्भवः॥
कृष्णपक्षे तृतीयाया दशम्याश्च परार्द्धतः।
सप्तम्याश्च चतुर्द्दश्याः पूर्व्वार्द्धे विष्टिरीरिता॥
विहाय विपरीताणि विष्टिं सर्व्वत्र वर्जयेत्।
विष्टिशेषे त्रिदण्डे हि पुच्छे कार्य्यं जयावहम्॥"
कर्म्मप्रकाशे तस्या अङ्गविशेषो यथा,—
"नाद्यस्तु पञ्चवदनं गलकस्तथैका
वक्षो दशैकसहिता नियतं चतस्रः।
नाभिः कटिः षड्थ पुच्छलता च तिस्रो
विष्टेर्भुवं निगदितोऽङ्गविभाग एषः॥"
अङ्गविशेषे कार्य्यध्वंसादिफलम् यथा,—
"मुखे कार्य्यध्वंसो भवति मरणञ्चाथ गलके
धनम्लानिर्वक्षस्यथ कटितटे बुद्धिविलयः।